# জযদেবকৃত গীতগোবিন্দং (অষ্টপদী)

cহপ্তের্{॥ গীতগোবিন্দং ॥}

{॥ শ্রীগোপালকধ্যানম্ ॥}

যদ্গোপীবদনেন্দুমণ্ডনমভূৎকস্তূরিকাপত্রকং

যল্লক্ষ্মীকুচশাতকুম্ভকলশে ব্যাগোচমিন্দীবরম্ ।

যন্নির্বাণবিধানসাধনবিধৌ সিদ্ধাঞ্জনং যোগিনাং

তন্নঃ শ্যামলমাবিরস্তু হৃদযে কৃষ্ণাভিধানং মহঃ ॥ ১॥

{॥ শ্রীজযদেবধ্যানম্ ॥}

রাধামনোরমরমাবররাসলীলা-

গানামৃতৈকভণিতং কবিরাজরাজম্ ।

শ্রীমাধবার্চ্চনবিধাবনুরাগসদ্ম-

পদ্মাবতীপ্রিযতমং প্রণতোঽস্মি নিত্যম্ ॥ ২॥

শ্রীগোপালবিলাসিনী বলযসদ্রত্নাদিমুগ্ধাকৃতি

শ্রীরাধাপতিপাদপদ্মভজনানন্দাব্ধিমগ্নোঽনিশম্ ॥

লোকে সৎকবিরাজরাজ ইতি যঃ খ্যাতো দযাম্ভোনিধিঃ

তং বন্দে জযদেবসদ্গুরুমহং পদ্মাবতীবল্লভম্ ॥ ৩॥

।তি

cহপ্তের্{॥ প্রথমঃ সর্গঃ ॥}

{॥ সামোদদামোদরঃ ॥}

মেঘৈর্মেদুরমম্বরং বনভুবঃ শ্যামাস্তমালদ্রুমৈ-

র্নক্তং ভীরুরযং ত্বমেব তদিমং রাধে গৃহং প্রাপয ।

ইত্থং নন্দনিদেশিতশ্চলিতযোঃ প্রত্যধ্বকুঞ্জদ্রুমং

রাধামাধবযোর্জযন্তি যমুনাকূলে রহঃকেলযঃ ॥ ১॥

বাগ্দেবতাচরিতচিত্রিতচিত্তসদ্মা

পদ্মাবতীচরণচারণচক্রবর্তী ।

শ্রীবাসুদেবরতিকেলিকথাসমেত-

মেতং করোতি জযদেবকবিঃ প্রবন্ধম্ ॥ ২॥

বাচঃ পল্লবযত্যুমাপতিধরঃ সন্দর্ভশুদ্ধিং গিরাং

জানীতে জযদেব এব শরণঃ শ্লাঘ্যো দুরূহদ্রুতে ।

শৃঙ্গারোত্তরসৎপ্রমেযরচনৈরাচার্যগোবর্ধন-

স্পর্ধী কোঽপি ন বিশ্রুতঃ শ্রুতিধরো ধোযী কবিক্ষ্মাপতিঃ ॥ ৩॥

যদি হরিস্মরণে সরসং মনো

যদি বিলাসকলাসু কুতূহলম্ ।

মধুরকোমলকান্তপদাবলীং

শৃণু তদা জযদেবসরস্বতীম্ ॥ ৪॥

{॥ গীতম্ ১ ॥}

প্রলযপযোধিজলে ধৃতবানসি বেদম্ ।

বিহিতবহিত্রচরিত্রমখেদম্ ॥

কেশব ধৃতমীনশরীর জয জগদীশ হরে ॥ ১॥

ক্ষিতিরতিবিপুলতরে তব তিষ্ঠতি পৃষ্ঠে ।

ধরণিধরণকিণচক্রগরিষ্ঠে ॥

কেশব ধৃতকচ্ছপরূপ জয জগদীশ হরে ॥ ২॥

বসতি দশনশিখরে ধরণী তব লগ্না ।

শশিনি কলঙ্ককলেব নিমগ্না ॥

কেশব ধৃতসূকররূপ জয জগদীশ হরে ॥ ৩॥

তব করকমলবরে নখমদ্ভুতশৃঙ্গম্ ।

দলিতহিরণ্যকশিপুতনুভৃঙ্গম্ ॥

কেশব ধৃতনরহরিরূপ জয জগদীশ হরে ॥ ৪॥

ছলযসি বিক্রমণে বলিমদ্ভুতবামন ।

পদনখনীরজনিতজনপাবন ॥

কেশব ধৃতবামনরূপ জয় জগদীশ হরে ॥ ৫॥

ক্ষত্রিযরুধিরমযে জগদপগতপাপম্ ।

স্নপযসি পযসি শমিতভবতাপম্ ॥

কেশব ধৃতভৃগুপতিরূপ জয় জগদীশ হরে ॥ ৬॥

বিতরসি দিক্ষু রণে দিক্পতিকমনীযম্ ।

দশমুখমৌলিবলিং রমণীযং ॥

কেশব ধৃতরামশরীর জয় জগদীশ হরে ॥ ৭॥

বহসি বপুষি বিশদে বসনং জলদাভম্ ।

হলহতিভীতিমিলিতযমুনাভম্ ॥

কেশব ধৃতহলধররূপ জয় জগদীশ হরে ॥ ৮॥

নিন্দতি যজ্ঞবিধেরহহ শ্রুতিজাতম্ ।

সদযহৃদযদর্শিতপশুঘাতম্ ॥

কেশব ধৃতবুদ্ধশরীর জয় জগদীশ হরে ॥ ৯॥

ম্লেচ্ছনিবহনিধনে কলযসি করবালম্ ।

ধূমকেতুমিব কিমপি করালম্ ॥

কেশব ধৃতকল্কিশরীর জয় জগদীশ হরে ॥ ১০॥

শ্রীজযদেবকবেরিদমুদিতমুদারম্ ।

শৃণু সুখদং শুভদং ভবসারম্ ॥

কেশব ধৃতদশবিধরূপ জয় জগদীশ হরে ॥ ১১॥

বেদানুদ্ধরতে জগন্নিবহতে ভূগোলমুদ্বিভ্রতে

দৈত্যং দারযতে বলিং ছলযতে ক্ষত্রক্ষযং কুর্বতে ।

পৌলস্ত্যং জযতে হলং কলযতে কারুণ্যমাতন্বতে

ম্লেচ্ছান্মূর্চ্ছযতে দশাকৃতিকৃতে কৃষ্ণায তুভ্যং নমঃ ॥ ৫॥

{॥ গীতম্ ২ ॥}

শ্রিতকমলাকুচমণ্ডল ধৃতকুণ্ডল এ ।

কলিতললিতবনমাল জয় জযদেব হরে ॥ ১॥

দিনমণিমণ্ডলমণ্ডন ভবখণ্ডন এ ।

মুনিজনমানসহংস জয় জয়দেব হরে ॥ ২॥

কালিয়বিষধরভঞ্জন জনরঞ্জন এ ।

যদুকুলনলিনদিনেশ জয় জয়দেব হরে ॥ ৩॥

মধুমুরনরকবিনাশন গরুডাসন এ ।

সুরকুলকেলিনিদান জয় জয়দেব হরে ॥ ৪॥

অমলকমলদললোচন ভবমোচন এ ।

ত্রিভুবনভবননিধান জয় জয়দেব হরে ॥ ৫॥

জনকসুতাকৃতভূষণ জিতদূষণ এ ।

সমরশমিতদশকণ্ঠ জয় জয়দেব হরে ॥ ৬॥

অভিনবজলধরসুন্দর ধৃতমন্দর এ ।

শ্রীমুখচন্দ্রচকোর জয় জয়দেব হরে ॥ ৭॥

শ্রীজয়দেবকবেরিদং কুরুতে মুদম্ এ ।

মঙ্গলমুজ্জ্বলগীতং জয় জয়দেব হরে ॥ ৮॥

পদ্মাপয়োধরতটীপরিরম্ভলগ্ন-

কাশ্মীরমুদ্রিতমুরো মধুসূদনস্য ।

ব্যক্তানুরাগমিব খেলদনঙ্গখেদ-

স্বেদাম্বুপূরমনুপূরযতু প্রিযং বঃ ॥ ৬॥

বসন্তে বাসন্তীকুসুমসুকুমারৈরবযবৈ-

র্ভ্রমন্তীং কান্তারে বহুবিহিতকৃষ্ণানুসরণাম্ ।

অমন্দং কন্দর্পজ্বরজনিতচিন্তাকুলতযা

বলদ্বাধাং রাধাং সরসমিদমুচে সহচরী ॥ ৭॥

{॥ গীতম্ ৩ ॥}

ললিতলবঙ্গলতাপরিশীলনকোমলমলযসমীরে ।

মধুকরনিকরকরম্বিতকোকিলকূজিতকুঞ্জকুটীরে ॥

বিহরতি হরিরিহ সরসবসন্তে

নৃত্যতি যুবতিজনেন সমং সখি বিরহিজনস্য দুরন্তে ॥ ১॥ বিহরতি

উন্মদমদনমনোরথপথিকবধূজনজনিতবিলাপে ।

অলিকুলসংকুলকুসুমসমূহনিরাকুলবকুলকলাপে ॥ ২॥ বিহরতি

মৃগমদসৌরভরভসবশংবদনবদলমালতমালে ।

যুবজনহৃদযবিদারণমনসিজনখরুচিকিংশুকজালে ॥ ৩॥ বিহরতি

মদনমহীপতিকনকদণ্ডরুচিকেসরকুসুমবিকাসে ।

মিলিতশিলীমুখপাটলিপটলকৃতস্মরতূণবিলাসে ॥ ৪॥ বিহরতি

বিগলিতলজ্জিতজগদবলোকনতরুণকরুণকৃতহাসে ।

বিরহিনিকৃন্তনকুন্তমুখাকৃতিকেতকদন্তুরিতাশে ॥ ৫॥ বিহরতি

মাধবিকাপরিমলললিতে নবমালিকজাতিসুগন্ধৌ ।

মুনিমনসামপি মোহনকারিণি তরুণাকারণবন্ধৌ ॥ ৬॥ বিহরতি

স্ফুরদতিমুক্তলতাপরিরম্ভণমুকুলিতপুলকিতচূতে ।

বৃন্দাবনবিপিনে পরিসরপরিগতযমুনাজলপূতে ॥ ৭॥ বিহরতি

শ্রীজযদেবভণিতমিদমুদযতি হরিচরণস্মৃতিসারম্ ।

সরসবসন্তসমযবনবর্ণনমনুগতমদনবিকারম্ ॥ ৮॥ বিহরতি

দরবিদলিতমল্লীবল্লিচঞ্চৎপরাগ-

প্রকটিতপটবাসৈর্বাসযন্ কাননানি ।

ইহ হি দহতি চেতঃ কেতকীগন্ধবন্ধুঃ

প্রসরদসমবাণপ্রাণবদ্গন্ধবাহঃ ॥ ৮॥

উন্মীলন্মধুগন্ধলুব্ধমধুপব্যাধূতচূতাঙ্কুর-

ক্রীডৎকোকিলকাকলীকলরবৈরুদ্গীর্ণকর্ণজ্বরাঃ । var - কলৈঃ

নীযন্তে পথিকৈঃ কথং কথমপি ধ্যানাবধানক্ষণ-

প্রাপ্তপ্রাণসমাসমাগমরসোল্লাসৈরমী বাসরাঃ ॥ ৯॥

অনেকনারীপরিরম্ভসম্ভ্রম-

স্ফুরন্মনোহারিবিলাসলালসম্ ।

মুরারিমারাদুপদর্শযন্ত্যসৌ

সখীসমক্ষং পুনরাহ রাধিকাম্ ॥ ১০॥

{॥ গীতম্ ৪ ॥}

চন্দনচর্চিতনীলকলেবরপীতবসনবনমালী ।

কেলিচলন্মণিকুণ্ডলমণ্ডিতগণ্ডযুগস্মিতশালী ॥

হরিরিহমুগ্ধবধূনিকরে

বিলাসিনি বিলসতি কেলিপরে ॥ ১॥

পীনপযোধরভারভরেণ হরিং পরিরম্য সরাগম্ ।

গোপবধূরনুগাযতি কাচিদুদঞ্চিতপঞ্চমরাগম্ ॥ ২॥ হরিরিহ

কাপি বিলাসবিলোলবিলোচনখেলনজনিতমনোজম্ ।

ধ্যাযতি মুগ্ধবধূরধিকং মধুসূদনবদনসরোজম্ ॥ ৩॥ হরিরিহ

কাপি কপোলতলে মিলিতা লপিতুং কিমপি শ্রুতিমূলে ।

চারু চুচুম্ব নিতম্ববতী দযিতং পুলকৈরনুকূলে ॥ ৪॥ হরিরিহ

কেলিকলাকুতুকেন চ কাচিদমুং যমুনাজলকূলে ।
মঞ্জুলবঞ্জুলকুঞ্জগতং বিচকর্ষ করেণ দুকূলে ॥ ৫॥ হরিরিহ

করতলতালতরলবলযাবলিকলিতকলস্বনবংশে ।
রাসরসে সহ নৃত্যপরা হরিণা যুবতিঃ প্রশশংসে ॥ ৬॥ হরিরিহ

শ্লিষ্যতি কামপি চুম্বতি কামপি কামপি রমযতি রামাম্ ।
পশ্যতি সস্মিতচারুতরামপরামনুগচ্ছতি বামাম্ ॥ ৭॥ হরিরিহ var - পরাং

শ্রীজযদেবকবেরিদমদ্ভুতকেশবকেলিরহস্যম্ ।
বৃন্দাবনবিপিনে ললিতং বিতনোতু শুভানি যশস্যম্ ॥ ৮॥ হরিরিহ

বিশ্বেষামনুরঞ্জনে জনযন্নানন্দমিন্দীবর-
শ্রেণীশ্যামলকোমলৈরুপনযন্নঙ্গৈরনঙ্গোৎসবম্ ।
স্বচ্ছন্দং ব্রজসুন্দরীভিরভিতঃ প্রত্যঙ্গমালিঙ্গিতঃ
শৃঙ্গারঃ সখি মূর্তিমানিব মধৌ মুগ্ধো হরিঃ ক্রীডতি ॥ ১১॥

অদ্যোৎসঙ্গবসদ্ভুজঙ্গকবলক্লেশাদিবেশাচলং var - নিত্যোৎসঙ্গ
প্রালেযপ্লবনেচ্ছযানুসরতি শ্রীখণ্ডশৈলানিলঃ ।
কিং চ স্নিগ্ধরসালমৌলিমুকুলান্যালোক্য হর্ষোদযা-
দুন্মীলন্তি কুহূঃ কুহূরিতি কলোত্তলাঃ পিকানাং গিরঃ ॥ ১২॥

রাসোল্লাসভরেণবিভ্রমভৃতামাভীরবামভ্রুবা-

মভ্যর্ণে পরিরভ্য নির্ভরমুরঃ প্রেমান্ধযা রাধযা ।

সাধু ত্বদ্বদনং সুধামযমিতি ব্যাহৃত্য গীতস্তুতি-

ব্যাজাদুদ্ভটচুম্বিতস্মিতমনোহরী হরিঃ পাতু বঃ ॥ ১৩॥

॥ ইতি শ্রীগীতগোবিন্দে সামোদদামোদরো নাম প্রথমঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ দ্বিতীযঃ সর্গঃ ॥}

{॥ অক্লেশকেশবঃ ॥}

বিহরতি বনে রাধা সাধারণপ্রণযে হরৌ

বিগলিতনিজোৎকর্ষাদীর্ষ্যাবশেন গতান্যতঃ ।

ক্বচিদপি লতাকুঞ্জে গুঞ্জন্মধুব্রতমণ্ডলী-

মুখরশিখরে লীনা দীনাপ্যুবাচ রহঃ সখীম্ ॥ ১৪॥

{॥ গীতম্ ৫ ॥}

সংচরদধরসুধামধুরধ্বনিমুখরিতমোহনবংশম্ ।

চলিতদৃগঞ্চলচঞ্চলমৌলিকপোলবিলোলবতংসম্ ॥

রাসে হরিমিহ বিহিতবিলাসং

স্মরতি মনো মম কৃতপরিহাসম্ ॥ ১॥

চন্দ্রকচারুমযূরশিখণ্ডকমণ্ডলবলযিতকেশম্ ।

প্রচুরপুরন্দরধনুরনুরঞ্জিতমেদুরমুদিরসুবেশম্ ॥ ২॥ রাসে হরিমিহ

গোপকদম্বনিতম্ববতীমুখচুম্বনলম্ভিতলোভম্ ।

বন্ধুজীবমধুরাধরপল্লবমুল্লসিতস্মিতশোভম্ ॥ ৩॥ রাসে হরিমিহ

বিপুলপুলকভুজপল্লববলযিতবল্লবযুবতিসহস্রম্ ।

করচরণোরসি মণিগণভূষণকিরণবিভিন্নতমিস্রম্ ॥ ৪॥ রাসে হরিমিহ

জলদপটলচলদিন্দুবিনন্দকচন্দনতিলকললাটম্ ।

পীনঘনস্তনমণ্ডলমর্দননির্দযহৃদযকপাটম্ ॥ ৫॥ রাসে হরিমিহ var - পীনপযোধরপরিসর

মণিমযমকরমনোহরকুণ্ডলমণ্ডিতগণ্ডমুদারম্ ।

পীতবসনমনুগতমুনিমনুজসুরাসুরবরপরিবারম্ ॥ ৬॥ রাসে হরিমিহ

বিশদকদম্বতলে মিলিতং কলিকলুষভযং শমযন্তম্ ।

মামপি কিমপি তরঙ্গদনঙ্গদৃশা মনসা রমযন্তম্ ॥ ৭॥ রাসে হরিমিহ var - বপুষা

শ্রীজযদেবভণিতমতিসুন্দরমোহনমধুরিপুরূপম্ ।

হরিচরণস্মরণং প্রতি সম্প্রতি পুণ্যবতামনুরূপম্ ॥ ৮॥ রাসে হরিমিহ

গণযতি গুণগ্রামং ভ্রামং ভ্রমাদপি নেহতে

বহতি চ পরিতোষং দোষং বিমুঞ্চতি দূরতঃ ।

যুবতিষু বলস্তৃষ্ণে কৃষ্ণে বিহারিণি মাং বিনা

পুনরপি মনো বামং কামং করোতি করোমি কিম্ ॥ ১৫॥

{॥ গীতম্ ৬ ॥}

নিভৃতনিকুঞ্জগৃহং গতযা নিশি রহসি নিলীয বসন্তম্ ।

চকিতবিলোকিতসকলদিশা রতিরভসরসেন হসন্তম্ ॥

সখি হে কেশিমথনমুদারম্

রময মযা সহ মদনমনোরথভাবিতযা সবিকারম্ ॥ ১॥

প্রথমসমাগমলজ্জিতযা পটুচাটুশতৈরনুকূলম্ ।

মৃদুমধুরস্মিতভাষিতযা শিথিলীকৃতজধনদুকূলম্ ॥ ২ ॥ সখি হে

কিসলযশযননিবেশিতযা চিরমুরসি মমৈব শযানম্ ।

কৃতপরিরম্ভণচুম্বনযা পরিরভ্য কৃতাধরপানম্ ॥ ৩॥ সখি হে

অলসনিমীলিতলোচনযা পুলকাবলিললিতকপোলম্ ।

শ্রমজলসকলকলেবরযা বরমদনমদাদতিলোলম্ ॥ ৪ ॥ সখি হে

কোকিলকলরবকূজিতযা জিতমনসিজতন্ত্রবিচারম্ ।

শ্লথকুসুমাকুলকুন্তলযা নখলিখিতঘনস্তনভারম্ ॥ ৫॥ সখি হে

চরণরণিতমণিনূপুরযা পরিপূরিতসুরতবিতানম্ ।

মুখরবিশৃঙ্খলমেখলযা সকচগ্রহচুম্বনদানম্ ॥ ৬॥ সখি হে

রতিসুখসমযরসালসযা দরমুকুলিতনযনসরোজম্ ।

নিঃসহনিপতিততনুলতযা মধুসূদনমুদিতমনোজম্ ॥ ৭॥ সখি হে

শ্রীজযদেবভণিতমিদমতিশযমধুরিপুনিধুবনশীলম্ ।

সুখমুৎকণ্ঠিতগোপবধূকথিতং বিতনোতু সলীলম্ ॥ ৮॥ সখি হে var - রাধিকযা

হস্তস্রস্তবিলাসবংশমনৃজুভ্রূবল্লিমদ্বল্লবী-

বৃন্দোৎসারিদৃগন্তবীক্ষিতমতিস্বেদার্দ্রগণ্ডস্থলম্ ।

মামুদ্বীক্ষ্য বিলক্ষিতং স্মিতসুধামুগ্ধাননং কাননে

গোবিন্দং ব্রজসুন্দরীগণবৃতং পশ্যামি হৃষ্যামি চ ॥ ১৬॥

দুরালোকস্তোকস্তবকনবকাশোকলতিকা-

বিকাসঃ কাসারোপবনপবনোঽপি ব্যথযতি ।

অপি ভ্রাম্যদ্ভৃঙ্গীরণিতরমণীযা ন মুকুল-

প্রসূতিশ্চূতানাং সখি শিখরিণীযং সুখযতি ॥ ১৭॥

সাকূতস্মিতমাকুলাকুলগলদ্ধম্মিল্লমুল্লাসিত-

ভ্রূবল্লীকমলীকদর্শিতভুজামূলার্দ্ধপৃষ্ঠস্তনম্ ।

গোপীনাং নিভৃতং নিরীক্ষ্য গমিতাকাঙ্ক্ষশ্চিরং চিন্তয-

ন্নন্তর্মুগ্দ্ধমনোহরো হরতু বঃ ক্লেশং ন বঃ কেশবঃ ॥ ১৮॥

॥ ইতি গীতগোবিন্দে অক্লেশকেশবো নাম দ্বিতীযঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ তৃতীযঃ সর্গঃ ॥}

{॥ মুগ্ধমধুসূদনঃ ॥}

কংসারিরপি সংসারবাসনাবন্ধশৃঙ্খলাম্ ।

রাধামাধায হৃদযে তত্যাজ ব্রজসুন্দরীঃ ॥ ১৯॥

ইতস্ততস্তামনুসৃত্য রাধিকা-

মনঙ্গবাণব্রণখিন্নমানসঃ ।

কৃতানুতাপঃ স কলিন্দনন্দিনী-

তটান্তকুঞ্জে নিষসাদ মাধবঃ ॥ ২০॥

{॥ গীতম্ ৭ ॥}

মামিযং চলিতা বিলোক্য বৃতং বধূনিচযেন ।

সাপরাধতযা মযাপি ন বারিতাতিভযেন ॥

হরিহরি হতাদরতযা গতা সা গতা কুপিতেব ॥ ১॥

কিং করিষ্যতি কিং বদিষ্যতি সা চিরং বিরহেণ ।

কিং ধনেন জনেন কিং মম জীবনেন গৃহেণ ॥ ২॥ হরিহরি

চিন্তযামি তদাননং কুটিলভ্রু কোপভরেণ ।

শোণপদ্মমিবোপরি ভ্রমতাকুলভ্রমরেণ ॥ ৩॥ হরিহরি

তামহং হৃদি সংগতামনিশং ভৃশং রমযামি ।

কিং বনেঽনুসরামি তামিহ কিং বৃথা বিলপামি ॥ ৪ ॥ হরিহরি

তন্বি খিন্নমসূযযা হৃদযং তবাকলযামি ।

তন্ন বেদ্মি কুতো গতাসি ন তেন তেঽনুনযামি ॥ ৫॥ হরিহরি

দৃশ্যসে পুরতো গতাগতমেব তে বিদধাসি ।

কিং পুরেব সমম্ভ্রমং পরিরম্ভণং ন দদাসি ॥ ৬॥ হরিহরি

ক্ষম্যতামপরং কদাপি তবেদৃশং ন করোমি ।

দেহি সুন্দরি দর্শনং মম মন্মথেন দুনোমি ॥ ৭॥ হরিহরি

বর্ণিতং জযদেবকেন হরেরিদং প্রবণেন ।

কিন্দুবিল্বসমুদ্রসম্ভবরোহিণীরমণেন ॥ ৮॥ হরিহরি

কুবলযদলশ্রেণী কণ্ঠে ন সা গরলদ্যুতিঃ

হৃদি বিসলতাহারো নাযং ভুজঙ্গমনাযকঃ ।

মলযজরজো নেদং ভস্ম প্রিযারহিতে মযি

প্রহর ন হরভ্রান্ত্যানঙ্গ ক্রুধা কিমু ধাবসি ॥ ২১॥

পাণৌ মা কুরু চূতসাযকমমুং মা চাপমারোপয

ক্রীডানির্জিতবিশ্বমূর্ছিতজনাঘাতেন কিং পৌরুষম্ ।

তস্যা এব মৃগীদৃশো মনসিজপ্রেঙ্খৎকটাক্ষাশুগ-

শ্রেণীজর্জরিতং মনাগপি মনো নাদ্যাপি সংধুক্ষতে ॥ ২২॥

ভ্রূচাপে নিহিতঃ কটাক্ষবিশিখো নির্মাতু মর্মব্যথাং

শ্যামাত্মা কুটিলঃ করোতু কবরীভারোঽপি মারোদ্যমম্ ।

মোহং তাবদযং চ তন্বি তনুতাং বিম্বাধরো রাগবান্

সদ্বৃত্তস্তনমণ্ডলস্তব কথং প্রাণৈর্মম ক্রীডতি ॥ ২৩॥

তানি স্পর্শসুখানি তে চ তরলস্নিগ্ধা দৃশোর্বিভ্রমা-

স্তদ্বক্ত্রাম্বুজসৌরভং স চ সুধাস্যন্দির্গিরাং বক্রিমা ।

সা বিম্বাধরমাধুরীতি বিষযাসঙ্গেঽপি চেন্মানসং

তস্যাং লগ্নসমাধি হন্ত বিরহব্যাধিঃ কথং বর্ধতে ॥ ২৪॥

ভ্রূপল্লবং ধনুরপাঙ্গতরঙ্গিতনি var - ভ্রূবল্লরির্ধনু

বাণা গুণঃ শ্রবণপালিরিতি স্মরেণ ।

অস্যামনঙ্গজযজঙ্গমদেবতাযাং

অস্ত্রাণি নির্জিতজগন্তি কিমর্পিতানি ॥ ২৫॥

তির্যক্কণ্ঠবিলোলমৌলিতরলোত্তংসস্য বংশোচ্চলদ্-

গীতিস্থানকৃতাবধানললনালক্ষৈর্ন সংলক্ষিতাঃ ।

সম্মুগ্ধে মধুসূদনস্য মধুরে রাধামুখেন্দৌ মৃদু-

স্পন্দং কন্দলিতাশ্চিরং দদতু বঃ ক্ষেমং কটাক্ষোর্ময়ঃ ॥ ২৬ ॥

॥ ইতি শ্রীগিতগোবিন্দে মুগ্ধমধুসূদনো নাম তৃতীয়ঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ চতুর্থঃ সর্গঃ ॥}

{॥ স্নিগ্ধমধুসূদনঃ ॥}

যমুনাতীরবানীরনিকুঞ্জে মন্দমাস্থিতম্ ।

প্রাহ প্রেমভরোদ্ভ্রান্তং মাধবং রাধিকাসখী ॥ ২৭॥

{॥ গীতম্ ৮ ॥}

নিন্দতি চন্দনমিন্দুকিরণমনু বিন্দতি খেদমধীরম্ ।

ব্যালনিলযমিলনেন গরলমিব কলযতি মলযসমীরম্ ॥

মাধব মনসিজবিশিখভযাদিব ভাবনযা ত্বযি লীনা

সা বিরহে তব দীনা ॥ ১॥

অবিরলনিপতিতমদনশরাদিব ভবদবনায বিশালম্ ।

স্বহৃদযমর্মণী বর্ম করোতি সজলনলিনীদলজালম্ ॥ ২॥ সা বিরহে তব দীনা

কুসুমবিশিখশরতল্পমনল্পবিলাসকলাকমনীযম্ ।

ব্রতমিব তব পরিরম্ভসুখায করোতি কুসুমশযনীযম্ ॥ ৩॥ সা বিরহে তব দীনা

বহতি চ গলিতবিলোচনজলভরমাননকমলমুদারম্ । var - বিগলিতলোচন

বিধুমিব বিকটবিধুন্তুদদন্তদলনগলিতামৃতধারম্ ॥ ৪॥ সা বিরহে তব দীনা

বিলিখতি রহসি কুরঙ্গমদেন ভবন্তমসমশরভূতম্ ।

প্রণমতি মকরমধো বিনিধায করে চ শরং নবচূতম্ ॥ ৫॥ সা বিরহে তব দীনা

প্রতিপদমিদমপি নিগততি মাধব তব চরণে পতিতাহম্ ।

ত্বযি বিমুখে মযি সপদি সুধানিধিরপি তনুতে তনুদাহম্ ॥ ৬॥ সা বিরহে তব দীনা

ধ্যানলযেন পুরঃ পরিকল্প্য ভবন্তমতীব দুরাপম্ ।

বিলপতি হসতি বিষীদতি রোদিতি চঞ্চতি মুঞ্চতি তাপম্ ॥ ৭॥ সা বিরহে তব দীনা

শ্রীজযদেবভণিতমিদমধিকং যদি মনসা নটনীযম্ ।

হরিবিরহাকুলবল্লবযুবতিসখীবচনং পঠনীযম্ ॥ ৮॥ সা বিরহে তব দীনা

আবাসো বিপিনাযতে প্রিযসখীমালাপি জালাযতে

তাপোঽপি শ্বসিতেন দাবদহনজ্বালাকলাপাযতে ।

সাপি ত্বদ্বিরহেণ হন্ত হরিণীরূপাযতে হা কথং

কন্দর্পোঽপি যমাযতে বিরচযঞ্ছার্দূলবিক্রীডিতম্ ॥ ২৮॥

{॥ গীতম্ ৯ ॥}

স্তনবিনিহিতমপি হারমুদারম্ ।

সা মনুতে কৃশতনুরতিভারম্ ॥

রাধিকা বিরহে তব কেশব ॥ ১॥

সরসমসৃণমপি মলযজপঙ্কম্ ।

পশ্যতি বিষমিব বপুষি সশঙ্কম্ ॥ ২॥ রাধিকা

শ্বসিতপবনমনুপমপরিণাহম্ ।

মদনদহনমিব বহতি সদাহম্ ॥ ৩॥ রাধিকা

দিশি দিশি কিরতি সজলকণজালম্ ।

নযননলিনমিব বিগলিতনালম্ ॥ ৪॥ রাধিকা

নযনবিষযমপি কিসলযতল্পম্ ।

কলযতি বিহিতহুতাশবিকল্পম্ ॥ ৫॥ রাধিকা

ত্যজতি ন পাণিতলেন কপোলম্ ।

বালশশিনমিব সাযমলোলম্ ॥ ৬॥ রাধিকা

হরিরিতি হরিরিতি জপতি সকামম্ ।

বিরহবিহিতমরণেন নিকামম্ ॥ ৭॥ রাধিকা

শ্রীজযদেবভণিতমিতি গীতম্ ।

সুখযতু কেশবপদমুপনীতম্ ॥ ৮॥ রাধিকা

সা রোমাঞ্চতি সীৎকরোতি বিলপত্যুৎক্ম্পতে তাম্যতি

ধ্যাযত্যুদ্ভ্রমতি প্রমীলতি পতত্যুদ্যাতি মূর্চ্ছত্যপি ।

এতাবত্যতনুজ্বরে বরতনুর্জীবেন্ন কিং তে রসাত্

স্বর্বৈদ্যপ্রতিম প্রসীদসি যদি ত্যক্তোঽন্যথা নান্তকঃ ॥ ২৯॥ var - ত্যক্তান্যথান্যৎপরম্

স্মরাতুরাং দৈবতবৈদ্যহৃদ্য

ত্বদঙ্গসঙ্গামৃতমাত্রসাধ্যাম্ ।

বিমুক্তবাধাং কুরুষে ন রাধা-

মুপেন্দ্র বজ্রাদপি দারুণোঽসি ॥ ৩১॥

কন্দর্পজ্বরসংজ্বরস্তুরতনোরাশ্চর্যমস্যাশ্চিরং var - সজ্জ্বরাতুরতনোরথ্যর্থমস্যাশ্চিরং

চেতশ্চন্দনচন্দ্রমঃকমলিনীচিন্তাসু সংতাম্যতি ।

কিংতু ক্লান্তিবশেন শীতলতনুং ত্বামেকমেব প্রিযং

ধ্যাযন্তী রহসি স্থিতা কথমপি ক্ষীণা ক্ষণং প্রাণিতি ॥ ২৯॥

ক্ষণমপি বিরহঃ পুরা ন সেহে

নযননিমীলনখিন্নযা যযা তে ।

শ্বসিতি কথমসৌ রসালশাখাং

চিরবিরহেণ বিলোক্য পুষ্পিতাগ্রাম্ ॥ ৩২॥ var - বিরহেঽপি

বৃষ্টিব্যাকুলগোকুলাবনরসাদুদ্ধৃত্য গোবর্ধনং

বিভ্রদ্বল্লববল্লভাভিরধিকানন্দাচ্চিরং চুম্বিতঃ ।

দর্পেণেব তদর্পিতাধরতটীসিন্দূরমুদ্রাঙ্কিতো

বাহুর্গোপপতেস্তনোতু ভবতাং শ্রেয়াংসি কংসদ্বিষঃ ॥ ৩৩ ॥

॥ ইতি গীতগোবিন্দে স্নিগ্ধমাধবো নাম চতুর্থঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ পঞ্চমঃ সর্গঃ ॥}

{॥ সাকাংক্ষপুণ্ডরীকাক্ষঃ ॥}

অহমিহ নিবসামি যাহি রাধামনুনয় মদ্বচনেন চানযেথাঃ ।

ইতি মধুরিপুণা সখী নিযুক্তা স্বযমিদমেত্য পুনর্জগাদ রাধাম্ ॥ ৩৪ ॥

{॥ গীতম্ ১০ ॥}

বহতি মলযসমীরে মদনমুপনিধায ।

স্ফুটতি কুসুমনিকরে বিরহিহৃদযদলনায ॥

তব বিরহে বনমালী সখি সীদতি ॥ ১॥

দহতি শিশিরমযূখে মরণমনুকরোতি ।

পততি মদনবিশিখে বিলপতি বিকলতরোঽতি ॥ ২ ॥ তব বিরহে

ধ্বনতি মধুপসমূহে শ্রবণমপি দধাতি ।

মনসি বলিতবিরহে নিশি নিশি রুজমুপযাতি ॥ ৩॥ তব বিরহে

বসতি বিপিনবিতানে ত্যজতি ললিতধাম ।

লুঠতি ধরণিশযনে বহু বিলপতি তব নাম ॥ ৪ ॥ তব বিরহে

রণতি পিকসমুদাযে প্রতিদিশমনুযাতি ।

হসতি মনুজনিচযে বিরহমপলপতি নেতি ॥ ৫ ॥ তব বিরহে

স্ফুরতি কলরবরাবে স্মরতি ভণিতমেব ।

তব রতিসুখবিভবে বহুগণযতি গুণমতীব ॥ ৬॥ তব বিরহে

ত্বদভিদশুভদমাসং বদতু নরি শৃণোতি ।

তমপি জপতি সরসং পরযুবতিষু ন রতিমুপৈতি ॥ ৭॥ তব বিরহে

ভণতি কবিজযদেবে বিরহিবিলসিতেন ।

মনসি রভসবিভবে হরিরুদযতু সুকৃতেন ॥ ৮॥ তব বিরহে

পূর্বং যত্র সমং ত্বযা রতিপতেরাসাদিতঃ সিদ্ধয-

স্তস্মিন্নেব নিকুঞ্জমন্মথমহাতীর্থে পুনর্মাধবঃ ।

ধ্যাযংস্ত্বামনিশং জপন্নপি তবৈবালাপমন্ত্রাবলীং

ভূযস্ত্বৎকুচকুম্ভনির্ভরপরীরম্ভামৃতং বাঞ্ছতি ॥ ৩৫॥

{॥ গীতম্ ১১ ॥}

রতিসুখসারে গতমভিসারে মদনমনোহরবেশম্ ।

ন কুরু নিতম্বিনি গমনবিলম্বনমনুসর তং হৃদয়েশম্ ॥

ধীরসমীরে যমুনাতীরে বসতি বনে বনমালী

গোপীপীনপয়োধারমর্দনচঞ্চলকরযুগশালী ॥ ১॥

নাম সমেতং কৃতসংকেতং বাদয়তে মৃদুবেণুম্ ।

বহু মনুতে ননু তে তনুসংগতপবনচলিতমপি রেণুম্ ॥ ২॥ ধীরসমীরে var - তনু

পততি পতত্রে বিচলতি পত্রে শঙ্কিতভবদুপযানম্ ।

রচয়তি শয়নং সচকিতনয়নং পশ্যতি তব পন্থানম্ ॥ ৩॥ ধীরসমীরে

মুখরমধীরং ত্যজ মঞ্জীরং রিপুমিব কেলিসুলোলম্ ।

চল সখি কুঞ্জং সতিমিরপুঞ্জং শীলয় নীলনিচোলম্ ॥ ৪॥ ধীরসমীরে

উরসি মুরারেরুপহিতহারে ঘন ইব তরলবলাকে ।

তডিদিব পীতে রতিবিপরীতে রাজসি সুকৃতবিপাকে ॥ ৫॥ ধীরসমীরে

বিগলিতবসনং পরিহৃতরসনং ঘটয় জঘনমপিধানম্ ।

কিসলয়শয়নে পঙ্কজনয়নে নিধিমিব হর্ষনিদানম্ ॥ ৬॥ ধীরসমীরে

হরিরভিমানী রজনিরিদানীমিযমপি যাতি বিরামম্ ।
কুরু মম বচনং সত্বররচনং পূরয মধুরিপুকামম্ ॥ ৭॥ ধীরসমীরে

শ্রীজযদেবে কৃতহরিসেবে ভণতি পরমরমণীযম্ ।
প্রমুদিতহৃদযং হরিমতিসদযং নমত সুকৃতকমনীযম্ ॥ ৮॥ ধীরসমীরে

বিকিরতি মুহুঃ শ্বাসানাশাঃ পুরো মুহুরীক্ষতে
প্রবিশতি মুহুঃ কুঞ্জং গুঞ্জন্মুহুর্বহু তাম্যতি ।
রচযতি মুহুঃ শয্যাং পর্যাকুলং মুহুরীক্ষতে
মদনকদনক্লান্তঃ কান্তে প্রিযস্তব বর্ততে ॥ ৩৬॥

ত্বদ্বাম্যেন সমং সমগ্রমধুনা তিগ্মাংশুরস্তং গতো
গোবিন্দস্য মনোরথেন চ সমং প্রাপ্তং তমঃ সান্দ্রতাম্ ।
কোকানাং করুণস্বনেন সদৃশী দীর্ঘা মদভ্যর্থনা
তন্মুগ্ধে বিফলং বিলম্বনমসৌ রম্যোঽভিসারক্ষণঃ ॥ ৩৭॥

আশ্লেষাদনু চুম্বনাদনু নখোল্লেখাদনু স্বান্তজ-
প্রোদ্বোধাদনু সম্ভ্রমাদনু রতারম্ভাদনু প্রীতযোঃ ।
অন্যার্থং গতযোর্ভ্রমান্মিলিতযোঃ সম্ভাষণৈর্জানতো-
র্দম্পত্যোরিহ কো ন কো ন তমসি ব্রীডাবিমিশ্রো রসঃ ॥ ৩৮।

সভযচকিতং বিন্যস্যন্তীং দৃশৌ তিমিরে পথি

প্রতিতরু মুহুঃ স্থিত্বা মন্দং পদানি বিতন্বতীম্ ।

কথমপি রহঃ প্রাপ্তামঙ্গৈরনঙ্গতরঙ্গিভিঃ

সুমুখি সুভগঃ পশ্যন্স ত্বামুপৈতু কৃতার্থতাম্ ॥ ৩৯॥

রাধামুগ্ধমুখারবিন্দমধুপস্ত্রৈলোক্যমৌলিস্থলী

নেপথ্যোচিতনীলরত্নমবনীভারাবতারক্ষমঃ ।

স্বচ্ছন্দং ব্রজসুন্দরীজনমনস্তোষপ্রদোষশ্চিরং

কংসধ্বংসনধূমকেতুরবতু ত্বাং দেবকীনন্দনঃ ॥ ৪০॥

॥ ইতি শ্রীগীতগোবিন্দেঽভিসারিকবর্ণনে সাকাঙ্ক্ষপুণ্ডরীকাক্ষো নাম

পঞ্চমঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ ষষ্ঠঃ সর্গঃ ॥}

{॥ কুণ্ঠবৈকুণ্ঠঃ ॥}

অথ তাং গন্তুমশক্তাং চিরমনুরক্তাং লতাগৃহে দৃষ্ট্বা ।

তচ্চরিতং গোবিন্দে মনসিজমন্দে সখী প্রাহ ॥ ৪১॥

{॥ গীতম্ ১২ ॥}

পশ্যতি দিশি দিশি রহসি ভবন্তম্ ।

তদধরমধুরমধূনি পিবন্তম্ ॥ var - ত্বদধর

নাথ হরে (জয নাথ হরে) সীদতি রাধা বাসগৃহে ॥ ১॥

ত্বদভিসরণরভসেন বলন্তী ।

পততি পদানি কিযন্তি চলন্তী ॥ ২ ॥ নাথ হরে

বিহিতবিশদবিসকিসলযবলযা ।

জীবতি পরমিহ তব রতিকলযা ॥ ৩॥ নাথ হরে

মুহুরবলোকিতমণ্ডনলীলা ।

মধুরিপুরহমিতি ভাবনশীলা ॥ ৪ ॥ নাথ হরে

ত্বরিতমুপৈতি ন কথমভিসারম্ ।

হরিরিতি বদতি সখীমনুবারম্ ॥ ৫ ॥ নাথ হরে

শ্লিষ্যতি চুম্বতি জলধরকল্পম্ ।

হরিরুপগত ইতি তিমিরমনল্পম্ ॥ ৬॥ নাথ হরে

ভবতি বিলম্বিনি বিগলিতলজ্জা ।

বিলপতি রোদিতি বাসকসজ্জা ॥ ৭॥ নাথ হরে

শ্রীজযদেবকবেরিদমুদিতম্ ।

রসিকজনং তনুতামতিমুদিতম্ ॥ ৮॥ নাথ হরে

বিপুলপুলকপালিঃ স্ফীতসীৎকারমন্ত-

র্জনিতজডিমকাকুব্যাকুলং ব্যাহরন্তী ।

তব কিতব বিধাযামন্দকন্দর্পচিন্তাং var - বিধত্তে মন্দ

রসজলধিনিমগ্না ধ্যানলগ্না মৃগাক্ষী ॥ ৪২॥

অঙ্গেষ্বাভরণং করোতি বহুশঃ পত্রেঽপি সংচারিণি

প্রাপ্তং ত্বাং পরিশঙ্কতে বিতনুতে শয্যাং চিরং ধ্যাযতি ।

ইত্যাকল্পবিকল্পতল্পরচনাসংকল্পলীলাশত-

ব্যাসক্তাপি বিনা ত্বযা বরতনুর্নৈষা নিশাং নেষ্যতি ॥ ৪৩॥

কিং বিশ্রাম্যসি কৃষ্ণভোগিভবনে ভাণ্ডীরভূমীরুহি

ভ্রাতর্যাহি ন দৃষ্টিগোচরমিতঃ সানন্দনন্দাস্পদম্ ।

রাধাযা বচনং তদধ্বগমুখান্নন্দান্তিকে গোপতো

গোবিন্দস্য জযতি সাযমতিথিপ্রাশস্ত্যগর্ভা গিরঃ ॥ ৪৪ ॥

॥ ইতি গীতগোবিন্দে বাসকসজ্জাবর্ণনে কুণ্ঠবৈকুণ্ঠো নাম ষষ্ঠঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ সপ্তমঃ সর্গঃ ॥}

{॥ নাগরনারাযণঃ ॥}

অত্রান্তরে চ কুলটাকুলবর্ত্মপাত-

সংজাতপাতক ইব স্ফুটলাঞ্ছনশ্রীঃ ।

বৃন্দাবনান্তরমদীপযদংশুজালৈ-

দিক্সুন্দরীবদনচন্দনবিন্দুরিন্দুঃ ॥ ৪৫॥

প্রসরতি শশধরবিম্বে বিহিতবিলম্বে চ মাধবে বিধুরা ।
বিরচিতবিবিধবিলাপং সা পরিতাপং চকারোচ্চৈঃ ॥ ৪৬॥

{॥ গীতম্ ১৩ ॥}
কথিতসময়েঽপি হরিরহহ ন যযৌ বনম্ ।
মম বিফলমিদমমলরূপমপি যৌবনম্ ॥

যামি হে কমিহ শরণং সখীজনবচনবঞ্চিতা ॥ ১॥

যদনুগমনায নিশি গহনমপি শীলিতম্ ।
তেন মম হৃদযমিদমসমশরকীলিতম্ ॥ ২॥ যামি হে

মম মরণমেব বরমতিবিতথকেতনা ।
কিমিহ বিষহামি বিরহানলমচেতনা ॥ ৩॥ যামি হে

মামহহ বিধুরযতি মধুরমধুযামিনী ।
কাপি হরিমনুভবতি কৃতসুকৃতকামিনী ॥ ৪॥ যামি হে

অহহ কলযামি বলযাদিমণীভূষণম্ ।
হরিবিরহদহনবহনেন বহুদূষণম্ ॥ ৫॥ যামি হে

কুসুমসুকুমারতনুমতনুশরলীলযা ।

স্রগপি হৃদি হন্তি মামতিবিষমশীলযা ॥ ৬॥ যামি হে

অহমিহ নিবসামি ন গণিতবনবেতসা ।

স্মরতি মধুসূদনো মামপি ন চেতসা ॥ ৭॥ যামি হে

হরিচরণশরণজযদেবকবিভারতী ।

বসতু হৃদি যুবতিরিব কোমলকলাবতী ॥ ৮॥ যামি হে

তৎকিং কামপি কামিনীমভিসৃতঃ কিং বা কলাকেলিভি-

র্বদ্ধো বন্ধুভিরন্ধকারিণি বনোপান্তে কিমু ভ্রাম্যতি ।

কান্তঃ ক্লান্তমনা মনাগপি পথি প্রস্থাতুমেবাক্ষমঃ

সংকেতীকৃতমঞ্জুবঞ্জুললতাকুঞ্জেঽপি যন্নাগতঃ ॥ ৪৭॥

অথাগতং মাধবমন্তরেণ

সখীমিযং বীক্ষ্য বিষাদমূকাম্ ।

বিশঙ্কমনা রমিতং কযাপি

জনার্দনং দৃষ্টবদেতদাহ ॥ ৪৮॥

{॥ গীতম্ ১৪ ॥}

স্মরসমরোচিতবিরচিতবেশা ।

গলিতকুসুমদরবিলুলিতকেশা ॥

কাপি মধুরিপুণা বিলসতি যুবতিরধিকগুণা ॥ ১॥

হরিপরিরম্ভণবলিতবিকারা ।

কুচকলশোপরি তরলিতহারা ॥ ২॥ কাপি মধুরিপুণা

বিচলদলকললিতাননচন্দ্রা ।

তদধরপানরভসকৃততন্দ্রা ॥ ৩॥ কাপি মধুরিপুণা

চঞ্চলকুণ্ডলদলিতকপোলা ।

মুখরিতরশনজঘনগলিতলোলা ॥ ৪॥ কাপি মধুরিপুণা

দযিতবিলোকিতলজ্জিতহসিতা ।

বহুবিধকূজিতরতিরসরসিতা ॥ ৫॥ কাপি মধুরিপুণা

বিপুলপুলকপৃথুবেপথুভঙ্গা ।

শ্বসিতনিমীলিতবিকসদনঙ্গা ॥ ৬॥ কাপি মধুরিপুণা

শ্রমজলকণভরসুভগশরীরা ।

পরিপতিতোরসি রতিরণধীরা ॥ ৭॥ কাপি মধুরিপুণা

শ্রীজযদেবভণিতহরিরমিতম্ ।

কলিকলুষং জনযতু পরিশমিতম্ ॥ ৮॥ কাপি মধুরিপুণা

বিরহপাণ্ডুমুরারিমুখাম্বুজ-

দ্যুতিরিযং তিরযন্নপি বেদনাম্ । var চেতনাম্

বিধুরতীব তনোতি মনোভুবঃ

সুহৃদযে হৃদযে মদনব্যথাম্ ॥ ৪৯।

{॥ গীতম্ ১৫ ॥}

সমুদিতমদনে রমণীবদনে চুম্বনবলিতাধরে ।

মৃগমদতিলকং লিখতি সপুলকং মৃগমিব রজনীকরে ॥

রমতে যমুনাপুলিনবনে বিজযী মুরারিরধুনা ॥ ১॥

ঘনচযরুচিরে রচযতি চিকুরে তরলিততরুণাননে ।

কুরবককুসুমং চপলাসুষমং রতিপতিমৃগকাননে ॥ ২॥ রমতে

ঘটযতি সুঘনে কুচযুগগগনে মৃগমদরুচিরূষিতে ।

মণিসরমমলং তারকপটলং নখপদশশিভূষিতে ॥ ৩॥ রমতে

জিতবিসশকলে মৃদুভুজযুগলে করতলনলিনীদলে ।

মরকতবলযং মধুকরনিচযং বিতরতি হিমশীতলে ॥ ৪॥ রমতে

রতিগৃহজঘনে বিপুলাপঘনে মনসিজকনকাসনে ।

মণিমযরসনং তোরণহসনং বিকিরতি কৃতবাসনে ॥ ৫॥ রমতে

চরণকিসলযে কমলানিলযে নখমণিগণপূজিতে ।
বহিরপবরণং যাবকভরণং জনযতি হৃদি যোজিতে ॥ ৬॥ রমতে

রমযতি সুদৃশং কামপি সুভৃশং খলহলধরসোদরে ।
কিমফলমবসং চিরমিহ বিরসং বদ সখি বিটপোদরে ॥ ৭॥ রমতে

ইহ রসভণনে কৃতহরিগুণনে মধুরিপুপদসেবকে ।
কলিযুগচরিতং ন বসতু দুরিতং কবিনৃপজযদেবকে ॥ ৮॥ রমতে

নাযাতঃ সখি নির্দযো যদি শঠস্ত্বং দূতি কিং দূযসে
স্বচ্ছন্দং বহুবল্লভঃ স রমতে কিং তত্র তে দূষণম্ ।
পশ্যাদ্য প্রিযসঙ্গমায দযিতস্যাকৃষ্যমাণং গুণৈ-
রুৎকণ্ঠার্তিভরাদিব স্ফুটদিদং চেতঃ স্বযং যাস্যতি ॥ ৫০॥

{॥ গীতম্ ১৬ ॥}
অনিলতরলকুবলযনযনেন ।
তপতি ন সা কিসলযশযনেন ॥

সখি যা রমিতা বনমালিনা ॥ ১॥

বিকসিতসরসিজললিতমুখেন ।
স্ফুটতি ন সা মনসিজবিশিখেন ॥ ২॥ সখি যা

অমৃতমধুরমৃদুতরবচনেন ।

জ্বলতি ন সা মলযজপবনেন ॥ ৩॥ সখি যা

স্থলজলরুহরুচিকরচরণেন ।

লুঠতি ন সা হিমকরকিরণেন ॥ ৪ ॥ সখি যা

সজলজলদসমুদযরুচিরেণ ।

দলতি ন সা হৃদি বিহরভরেণ ॥ ৫ ॥ সখি যা var - চিরবিরহেণ

কনকনিকষরুচিশুচিবসনেন ।

শ্বসিতি ন সা পরিজনহসনেন ॥ ৬॥ সখি যা

সকলভুবনজনবরতরুণেন ।

বহতি ন সা রুজমতিকরুণেন ॥ ৭॥ সখি যা

শ্রীজযদেবভণিতবচনেন ।

প্রবিশতু হরিরপি হৃদযমনেন ॥ ৮॥ সখি যা

মনোভবানন্দন চন্দনানিল

প্রসীদ রে দক্ষিণ মুঞ্চ বামতাম্ ।

ক্ষণং জগৎপ্রাণ বিধায মাধবং

পুরো মম প্রাণহরো ভবিষ্যসি ॥ ৫১॥

রিপুরিব সখীসংবাসোঽযং শিখীব হিমানিলো

বিষমিব সুধারশ্মির্যস্মিন্দুনোতি মনোগতে।

হৃদযমদযে তস্মিন্নেবং পুনর্বলতে বলাত্

কুবলযদৃশাং বামঃ কামো নিকামনিরঙ্কুশঃ ॥ ৫২॥

বাধাং বিধেহি মলযানিল পঞ্চবাণ

প্রাণান্গৃহাণ ন গৃহং পুনরাশ্রযিষ্যে।

কিং তে কৃতান্তভগিনি ক্ষমযা তরঙ্গৈ-

রঙ্গানি সিঞ্চ মম শাম্যতু দেহদাহঃ ॥ ৫৩॥

প্রাতর্নীলনিচোলমচ্যুতমুরস্সংবীতপীতাম্বরং

রাধাযাশ্চকিতং বিলোক্য হসতি স্বৈরং সখীমণ্ডলে।

ব্রীলাচঞ্চলমঞ্চলং নযনযোরাধায রাধাননে

গূঢং স্মেরমুখোঽযমস্তু জগদানন্দায নন্দাত্মজঃ ॥ ৫৪॥

॥ ইতি গীতগোবিন্দে বিপ্রলব্ধাবর্ণনে নাগনারাযণো নাম সপ্তমঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ অষ্টমঃ সর্গঃ ॥}

{॥ বিলক্ষ্যলক্ষ্মীপতিঃ ॥}

অথ কথমপি যামিনীং বিনীয

স্মরশরজর্জরিতাপি সা প্রভাতে।

অনুনযবচনং বদন্তমগ্রে

প্রণতমপি প্রিযমাহ সাভ্যসূযম্ ॥ ৫৫॥

{॥ গীতম্ ১৭ ॥}

রজনিজনিতগুরুজাগররাগকষাযিতমলসনিবেশম্ ।

বহতি নযনমনুরাগমিব স্ফুটমুদিতরসাভিনিবেশম্ ॥

হরিহরি যাহি মাধব যাহি কেশব মা বদ কৈতববাদং

তামনুসর সরসীরুহলোচন যা তব হরতি বিষাদম্ ॥ ১॥

কজ্জলমলিনবিলোচনচুম্বনবিরচিতনীলিমরূপম্ ।

দশনবসনমরুণং তব কৃষ্ণ তনোতি তনোরনুরূপম্ ॥ ২॥ যাহি মাধব

বপুরনুহরতি তব স্মরসঙ্গরখরনখরক্ষতরেখম্ ।

মরকতশকলকলিতকলধৌতলিপিরেব রতিজযলেখম্ ॥ ৩॥ যাহি মাধব

চরণকমলগলদলক্তকসিক্তমিদং তব হৃদযমুদারম্ ।

দর্শযতীব বহির্মদনদ্রুমনবকিসলযপরিবারম্ ॥ ৪॥ যাহি মাধব

দশনপদং ভবদধরগতং মম জনযতি চেতসি খেদম্ ।

কথযতি কথমধুনাপি মযা সহ তব বপুরেতদভেদম্ ॥ ৫॥ যাহি মাধব

বহিরিব মলিনতরং তব কৃষ্ণ মনোঽপি ভবিষ্যতি নূনম্ ।

কথমথ বঞ্চযসে জনমনুগতমসমশরজ্বরদূনম্ ॥ ৬॥ যাহি মাধব

ভ্রমতি ভবানবলাকবলায বনেষু কিমত্র বিচিত্রম্ ।
প্রথযতি পূতনিকৈব বধূবধনির্দযবালচরিত্রম্ ॥ ৭॥ যাহি মাধব

শ্রীজযদেবভণিতরতিবঞ্চিতখণ্ডিতযুবতিবিলাপম্ ।
শৃণুত সুধামধুরং বিবুধা বিবুধালযতোঽপি দুরাপম্ ॥ ৮॥ যাহি মাধব

তদেবং পশ্যন্ত্যাঃ প্রসরদনুরাগং বহিরিব
প্রিযাপাদালক্তচ্ছুরিতমরুণচ্ছাযহৃদযম্ ।
মমাদ্য প্রখ্যাতপ্রণযভরভঙ্গেন কিতব
ত্বদালোকঃ শোকাদপি কিমপি লজ্জাং জনযতি ॥ ৫৬॥

অন্তর্মোহনমৌলিঘূর্ণনচলন্মন্দারবিস্রংসনঃ
স্তব্ধাকর্ষণলোচনোৎসবমহামন্ত্রঃ কুরঙ্গীদৃশাম্ ।
দৃপ্যদ্দানবদূযমানদিবিষদ্দূর্বারদুর্বেদনা-
দ্ধ্বংসঃ কংসরিপোঃ প্ররোপযতু বঃ শ্রেযাংসি বংশীরবঃ ॥ ৫৭॥

ইতি গীতগোবিন্দে খণ্ডিতাবর্ণনে বিলক্ষ্যলক্ষ্মীপতির্নাম অষ্ঠমঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ নবমঃ সর্গঃ ॥}

{॥ মন্দমুকুন্দঃ ॥}

তামথ মন্মথখিন্নাং

রতিরসভিন্নাং বিষাদসম্পন্নাম্ ।

var - অথ তাং মন্মথখিন্নাং রতিরসভিন্নাং বিবাদসম্পন্নাম্

অনুচিন্তিতহরিচরিতাং

কলহান্তরিতামুবাচ সখী ॥ ৫৮॥

{॥ গীতম্ ১৮ ॥}

হরিরভিসরতি বহতি মধুপবনে ।

কিমপরমধিকসুখং সখি ভুবনে ॥

মাধবে মা কুরু মানিনি মানময়ে ॥ ১॥

তালফলাদপি গুরুমতিসরসম্ ।

কিং বিফলীকুরুষে কুচকলশম্ ॥ ২॥ মাধবে

কতি ন কথিতমিদমনুপদমচিরম্ ।

মা পরিহর হরিমতিশযরুচিরম্ ॥ ৩॥ মাধবে

কিমিতি বিষীদসি রোদিষি বিকলা ।

বিহসতি যুবতিসভা তব সকলা ॥ ৪॥ মাধবে

মৃদুনলিনীদলশীতলশযনে ।

হরিমবলোকয সফলয নযনে ॥ ৫॥ মাধবে

জনযসি মনসি কিমিতি গুরুখেদম্ ।

শৃণু মম বচনমনীহিতভেদম্ ॥ ৬॥ মাধবে

হরিরুপযাতু বদতু বহুমধুরম্ ।

কিমিতি করোষি হৃদযমতিবিধুরম্ ॥ ৭॥ মাধবে

শ্রীজযদেবভণিতমতিললিতম্ ।

সুখযতু রসিকজনং হরিচরিতম্ ॥ ৮॥ মাধবে

স্নিগ্ধে যৎপরুষাসি যৎপ্রণমতি স্তব্ধাসি যদ্রাগিণি

দ্বেষস্থাসি যদুন্মুখে বিমুখতাং যাতাসি তস্মিন্প্রিযে ।

তদ্যুক্তং বিপরীতকারিণি তব শ্রীখণ্ডচর্চা বিষং var - যুক্তং তদ্

শীতাংশুস্তপনো হিমং হুতবহঃ ক্রীডামুদো যাতনাঃ ॥ ৫৯॥

সান্দ্রানন্দপুরন্দরাদিদিবিষদ্বৃন্দৈরমন্দাদরা-

দানম্রৈর্মকুটেন্দ্রনীলমণিভিঃ সন্দর্শিতেন্দিন্দিরম্ ।

স্বচ্ছন্দং মকরন্দসুন্দরগলন্মন্দাকিনীমেদুরং

শ্রীগোবিন্দপদারবিন্দমশুভস্কন্দায বন্দামহে ॥ ৬০॥

॥ ইতি গীতগোবিন্দে কলহান্তরিতাবর্ণনে মন্দমুকুন্দো নাম নবমঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ দশমঃ সর্গঃ ॥}

{॥ চতুরচতুর্ভুজঃ ॥}

অত্রান্তরে মসৃণরোষবশামসীম-

নিঃশ্বাসনিঃসহমুখীং সুমুখীমুপেত্য । var - সমুপেত্য রাধাম্

সব্রীডমীক্ষিতসখীবদনাং দিনান্তে

সানন্দগদ্গদপদং হরিরিত্যুবাচ ॥ ৬১॥ var - বিদং

{॥ গীতম্ ১৯ ॥}

বদসি যদি কিংচিদপি দন্তরুচিকৌমুদী

হরতি দরতিমিরমতিঘোরম্ ।

স্ফুরদধরসীধবে তব বদনচন্দ্রমা

রোচযতি লোচনচকোরম্ ॥

প্রিযে চারুশীলে মুঞ্চ মযি মানমনিদানং

সপদি মদনানলো দহতি মম মানসং

দেহি মুখকমলমধুপানম্ ॥ ১॥

সত্যমেবাসি যদি সুদতি মযি কোপিনী

দেহি খরনখরশরঘাতম্ ।

ঘটয ভুজবন্ধনং জনয রদখণ্ডনং

যেন বা ভবতি সুখজাতম্ ॥ ২॥ প্রিয়ে চারুশীলে

ত্বমসি মম ভূষণং ত্বমসি মম জীবনং

ত্বমসি মম ভবজলধিরত্নম্ ।

ভবতু ভবতীহ মযি সততমনোরোধিনী

তত্র মম হৃদযমতিযত্নম্ ॥ ৩॥ প্রিয়ে চারুশীলে

নীলনলিনাভমপি তন্বি তব লোচনং

ধারযতি কোকনদরূপম্ ।

কুসুমশরবাণভাবেন যদি রঞ্জযসি

কৃষ্ণমিদমেতদনুরূপম্ ॥ ৪॥ প্রিয়ে চারুশীলে

স্ফুরতু কুচকুম্ভযোরুপরি মণিমঞ্জরী

রঞ্জযতু তব হৃদযদেশম্ ।

রসতু রশনাপি তব ঘনজঘনমণ্ডলে

ঘোষযতু মন্মথনিদেশম্ ॥ ৫॥ প্রিয়ে চারুশীলে

স্থলকমলগঞ্জনং মম হৃদযরঞ্জনং

জনিতরতিরঙ্গপরভাগম্ ।

ভণ মসৃণবাণি করবাণি পদপঙ্কজং var - চরণদ্বযং

সরসলসদলক্তকরাগম্ ॥ ৬॥ প্রিয়ে চারুশীলে

স্মরগরলখণ্ডনং মম শিরসি মণ্ডনং

দেহি পদপল্লবমুদারম্ ।

জ্বলতি ময়ি দারুণো মদনকদনারুণো var - নানলো

হরতু তদুপাহিতবিকারম্ ॥ ৭॥ প্রিয়ে চারুশীলে

ইতি চটুলচাটুপটুচারু মুরবৈরিণো

রাধিকামধি বচনজাতম্ ।

জযতি পদ্মাবতীরমণজযদেবকবি-

ভারতীভণিতমিতিগীতম্ ॥ ৮॥ প্রিয়ে চারুশীলে

পরিহর কৃতাতঙ্কে শঙ্কাং ত্বযা সততং ঘন-

স্তনজঘনযাক্রান্তে স্বান্তে পরানবকাশিনি ।

বিশতি বিতনোরন্যো ধন্যো ন কোঽপি মমান্তরং

স্তনভরপরীরম্ভারম্ভে বিধেহি বিধেযতাম্ ॥ ৬২॥

মুগ্ধে বিধেহি ময়ি নির্দযদন্তদংশ-

দোর্বল্লিবন্ধনিবিডস্তনপীডনানি ।

চণ্ডি ত্বমেব মুদমঞ্চ ন পঞ্চবাণ-

চণ্ডালকাণ্ডদলনাদসবঃ প্রযান্তু ॥ ৬৩॥

ব্যথযতি বৃথা মৌনং তন্বি প্রপঞ্চয পঞ্চমং

তরুণি মধুরালাপৈস্তাপং বিনোদয দৃষ্টিভিঃ ।

সুমুখি বিমুখীভাবং তাবদ্বিমুঞ্চ ন মুঞ্চ মাং var - বঞ্চয

স্বযমতিশযস্নিগ্ধো মুগ্ধে প্রিযোঽহমুপস্থিতঃ ॥ ৬৪ ॥

বন্ধূকদ্যুতিবান্ধবোঽযমধরঃ স্নিগ্ধো মধূকচ্ছবি-

র্গণ্ডশ্চণ্ডি চকাস্তি নীলনলিনশ্রীমোচনং লোচনম্ ।

নাসাভ্যেতি তিলপ্রসূনপদবীং কুন্দাভদান্তি প্রিযে

প্রাযস্ত্বন্মুখসেবযা বিজযতে বিশ্বং স পুষ্পাযুধঃ ॥ ৬৫ ॥

দৃশৌ তব মদালসে বদনমিন্দুসন্দীপকং var - মত্যান্বিতং

গতির্জনমনোরমা বিধুতরম্ভমূরুদ্বযম্ ।

রতিস্তব কলাবতী রুচিরচিত্রলেখে ভ্রুবা-

বহো বিবুধযৌবনং বহসি তন্বী পৃথ্বীগতা ॥ ৬৬ ॥

শশিমুখি তব ভাতি ভঙ্গুরভ্রূর্যুবজনমোহনকরালকালসর্পী ।

তদুদিতবিষভেষজং ত্বিহৈকা ত্বদধরশীথুসুধৈব ভাগ্যভোগ্যা ॥ ৬৭ ॥

প্রীতিং বস্তনুতাং হরিঃ কুবলযাপীডেন সার্ধং রণে var - সা প্রীতিং তনুতাং

রাধাপীনপযোধরস্মরণকৃৎকুম্ভেন সম্ভেদবান্ ।

যত্র স্বিদ্যতি মীলতি ক্ষণমভূৎক্ষিপ্তদ্বিপেঽপি ক্ষণাত্

কংসস্যাথ বলে জিতং জিতমিতি ব্যামোহকোলাহলঃ ॥ ৬৮ ॥

var -: last 2 lines

পত্রে বিভ্যতি মীলতি ক্ষণমপি ক্ষিপ্রং তদালোকনাদ্-

ব্যামোহেন জিতং জিতং জিতমিতি ব্যালোলকোলাহলঃ ॥

॥ ইতি শ্রীগীতগোবিন্দে মানিনীবর্ণনে চতুরচতুর্ভুজো নাম দশমঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ একাদশঃ সর্গঃ ॥}

{॥ সানন্দদামোদরঃ ॥}

সুচিরমনুনযেন প্রীণযিত্বা মৃগাক্ষীং

গতবতি কৃতবেশে কেশবে কুঞ্জশয্যাম্ ।

রচিতরুচিরভূষাং দৃষ্টিমোষে প্রদোষে

স্ফুরতি নিরবসাদাং কাপি রাধাং জগাদ ॥ ৬৯॥

{॥ গীতম্ ২০ ॥}

বিরচিতচাটুবচনরচনং চরণে রচিতপ্রণিপাতম্ ।

var - : বিরচিতচাটুবচনেন চরণরচিতপ্রণিপাতম্

সম্প্রতি মঞ্জুলবঞ্জুলসীমনি কেলিশযনমনুযাতম্ ॥

মুগ্ধে মধুমথনমনুগতমনুসর রাধিকে ॥ ১॥

ঘনজঘনস্তনভারভরে দরমন্থরচরণবিহারম্ ।

মুখরিতমণীমঞ্জীরমুপৈহি বিধেহি মরালবিকারম্ ॥ ২॥ মুগ্ধে

শৃণু রমণীযতরং তরুণীজনমোহনমধুরিপুরাবম্ ।

কুসুমশরাসনশাসনবেন্দিনি পিকনিকরে ভজ ভাবম্ ॥ ৩॥ মুগ্ধে var - বন্দিনি

অনিলতরলকিসলযনিকরেণ করেণ লতানিকুরম্বম্ ।

প্রেরণমিব করভোরু করোতি গতিং প্রতিমুঞ্চ বিলম্বম্ ॥ ৪ ॥ মুগ্ধে

স্ফুরিতমনঙ্গতরঙ্গবশাদিব সূচিতহরিপরিরম্ভম্ ।

পৃচ্ছ মনোহরহারবিমলজলধারমমুং কুচকুম্ভম্ ॥ ৫ ॥ মুগ্ধে

অধিগতমখিলসখীভিরিদং তব বপুরপি রতিরণসজ্জম্ ।

চণ্ডি রণিতরশনারবডিণ্ডিমমভিসর সরসমলজ্জম্ ॥ ৬॥ মুগ্ধে

স্মরশরসুভগনখেন করেণ সখীমবলম্ব্য সলীলম্ । var - সখীমবলম্ব্য করেণ

চল বলযক্বণীতৈরববোধয হরমপি নিজগতিশীলম্ ॥ ৭ ॥ মুগ্ধে

শ্রীজযদেবভণিতমধরীকৃতহারমুদাসিতবামম্ ।

হরিবিনিহিতমনসামধিতিষ্ঠতু কণ্ঠতটীমবিরামম্ ॥ ৮॥ মুগ্ধে

সা মাং দ্রক্ষ্যতি বক্ষ্যতি স্মরকথাং প্রত্যঙ্গমালিঙ্গনৈঃ

প্রীতিং যাস্যতি রংস্যতে সখি সমাগত্যেতি চিন্তাকুলঃ ।

স ত্বাং পশ্যতি বেপতে পুলকযত্যানন্দতি স্বিদ্যতি

প্রত্যুদ্গচ্ছতি মূর্চ্ছতি স্থিরতমঃপুঞ্জে নিকুঞ্জে প্রিযঃ ॥ ৭০॥

অক্ষ্ণোর্নিক্ষিপদঞ্জনং শ্রবণয়োস্তাপিচ্ছগুচ্ছাবলীং

মূর্ধ্নি শ্যামসরোজদাম কুচয়োঃ কস্তূরিকাপত্রকম্ ।

ধূর্তানামভিসারসত্বরহৃদাং বিষ্বঙ্নিকুঞ্জে সখি

ধ্বান্তং নীলনিচোলচারু সুদৃশাং প্রত্যঙ্গমালিঙ্গতি ॥ ৭১॥

কাশ্মীরগৌরবপুষামভিসারিকাণাম্

আবদ্ধরেখমভিতো রুচিমঞ্জরীভিঃ ।

এতত্তমালদলনীলতমং তমিস্রং

তৎপ্রেমহেমনিকষোপলতাং তনোতি ॥ ৭২॥

হারাবলীতরলকাঞ্চনকাঞ্চিদাম-

কেয়ূরকঙ্কণমণিদ্যুতিদীপিতস্য ।

দ্বারে নিকুঞ্জনিলযস্য হরিং নিরীক্ষ্য

ব্রীডাবতীমথ সখী নিজগাহ রাধাম্ ॥ ৭৩॥

{॥ গীতম্ ২১ ॥}

মঞ্জুতরকুঞ্জতলকেলিসদনে ।

বিলস রতিরভসহসিতবদনে ॥

প্রবিশ রাধে মাধবসমীপমিহ ॥ ১॥

নবভবদশোকদলশযনসারে ।

বিলস কুচকলশতরলহারে ॥ ২ ॥ প্রবিশ

কুসুমচযরচিতশুচিবাসগেহে ।

বিলস কুসুমসুকুমারদেহে ॥ ৩॥ প্রবিশ

চলমলযবনপবনসুরভিশীতে ।

বিলস রসবলিতললিতগীতে ॥ ৪ ॥ প্রবিশ

মধুমুদিতমধুপকুলকলিতরাবে ।

বিলস মদনরসসরসভাবে ॥ ৫ ॥ প্রবিশ var - রভস

মধুরতরপিকনিকরনিনদমুখরে ।

বিলস দশনরুচিরুচিরশিখরে ॥ ৬॥ প্রবিশ

বিতত বহুবল্লিনবপল্লবঘনে ।

বিলস চিরমলসপীনজঘনে ॥ ৭ ॥ প্রবিশ

বিহিতপদ্মাবতীসুখসমাজে ।

ভণতি জযদেবকবিরাজে ।

কুরু মুরারে মঙ্গলশতানি ॥ ৮॥ প্রবিশ

ত্বাং চিত্তেন চিরং বহন্নযমতিশ্রান্তো ভৃশং তাপিতঃ

কন্দর্পেণ তু পাতুমিচ্ছতি সুধাসম্বাধবিম্বাধরম্ ।

অস্যাঙ্গং তদলংকুরু ক্ষণমিহ ভ্রূক্ষেপলক্ষ্মীলব-

ক্রীতে দাস ইবোপসেবিতপদাম্ভোজে কুতঃ সম্ভ্রমঃ ॥ ৭৪॥

সা সসাধ্বসসানন্দং গোবিন্দে লোললোচনা ।

সিঞ্জানা মঞ্জুমঞ্জীরং প্রবিবেশ নিবেশনম্ ॥ ৭৫॥

{॥ গীতম্ ২২ ॥}

রাধাবদনবিলোকনবিকসিতবিবিধবিকারবিভঙ্গম্ ।

জলনিধিমিব বিধুমণ্ডলদর্শনতরলিততুঙ্গতরঙ্গম্ ॥

হরিমেকরসং চিরমভিলষিতবিলাসং

সা দদার্শ গুরুহর্ষবশংবদবদনমনঙ্গনিবাসম্ ॥ ১॥

হারমমলতরতারমুরসি দধতং পরিরভ্য বিদূরম্ ।

স্ফুটতরফেনকদম্বকরম্বিতমিব যমুনাজলপূরম্ ॥ ২॥ হরিমেকরসং

শ্যামলমৃদুলকলেবরমণ্ডলমধিগতগৌরদুকূলম্ ।

নীলনলিনমিব পীতপরাগপটলভরবলযিতমূলম্ ॥ ৩॥ হরিমেকরসং

তরলদৃগঞ্চলচলনমনোহরবদনজনিতরতিরাগম্ ।

স্ফুটকমলোদরখেলিতখঞ্জনযুগমিব শরদি তডাগম্ ॥ ৪॥ হরিমেকরসং

বদনকমলপরিশীলনমিলিতমিহিরসমকুণ্ডলশোভম্ ।

স্মিতরুচিরুচিরসমুল্লসিতাধরপল্লবকৃতরতিলোভম্ ॥ ৫॥ হরিমেকরসং

শশিকিরণচ্ছুরিতোদরজলধরসুন্দরসকুসুমকেশম্ ।

তিমিরোদিতবিধুমণ্ডলনির্মলমলযজতিলকনিবেশম্ ॥ ৬॥ হরিমেকরসং

বিপুলপুলকভরদন্তুরিতং রতিকেলিকলাভিরধীরম্ ।

মণিগণকিরণসমূহসমুজ্জ্বলভূষণসুভগশরীরম্ ॥ ৭॥ হরিমেকরসং

শ্রীজযদেবভণিতবিভবদ্বিগুণীকৃতভূষণভারম্ ।

প্রণমত হৃদি সুচিরং বিনিধায হরিং সুকৃতোদযসারম্ ॥ ৮॥ হরিমেকরসং

var - হৃদি সুচিরং বিনিধায হরিং

অতিক্রম্যাপাঙ্গং শ্রবণপথপর্যন্তগমন-

প্রযাসেনেবাক্ষ্ণোস্তরলতরতারং পতিতযোঃ ।

ইদানীং রাধাযাঃ প্রিযতমসমালোকসময়ে

পপাত স্বেদাম্বুপ্রসর ইব হর্ষাশ্রুনিকরঃ ॥ ৭৬॥

ভবন্ত্যাস্তল্পান্তং কৃতকপটকণ্ডূতিপিহিত- var - ভজন্ত্যাস্তল্পান্তং

স্মিতং যাতে গেহাদ্বহিরবহিতালীপরিজনে ।

প্রিযাস্যং পশ্যন্ত্যাঃ স্মরশরসমাকূলসুভগং var - স্মরপরবশাকৃতসুভগং

সলজ্জা লজ্জাপি ব্যগমদিব দূরং মৃগদৃশঃ ॥ ৭৭॥

জযশ্রীবিন্যস্তৈর্মহিত ইব মন্দারকুসুমৈঃ

স্বযং সিন্দূরেণ দ্বিপরণমুদা মুদ্রিত ইব ।

ভুজাপীডক্রীডাহতকুবলযাপীডকরিণঃ

প্রকীর্ণাসৃগ্বিন্দুর্জযতি ভুজদণ্ডো মুরজিতঃ ॥ ৭৮॥

সৌন্দর্যৈকনিধেরনঙ্গললনালাবণ্যলীলাজুষো

রাধাযা হৃদি পল্বলে মনসিজক্রীডৈকরঙ্গস্থলে ।

রম্যোরোজসরোজখেলনরসিত্বাদাত্মনঃ খ্যাপযন্

ধ্যাতুর্মানসরাজহংসনিভতাং দেযান্মুকুন্দো মুদম্ ॥ ৭৯॥

॥ ইতি শ্রীগীতগোবিন্দে রাধিকামিলনে সানন্দদামোদরো নামৈকাদশঃ সর্গঃ ॥

¡তি

cহপ্তের্{॥ দ্বাদশঃ সর্গঃ ॥}

{॥ সুপ্রীতপীতাম্বরঃ ॥}

গতবতি সখীবৃন্দেঽমন্দত্রপাভরনির্ভর-

স্মরপরবশাকূতস্ফীতস্মিতস্নপিতাধরাম্ ।

সরসমনসং দৃষ্ট্বা রাধাং মুহুর্নবপল্লব-

প্রসবশযনে নিক্ষিপ্তাক্ষীমুবাচ হরিঃ প্রিযাম্ ॥ ৮০॥

{॥ গীতম্ ২৩ ॥}

কিসলযশযনতলে কুরু কামিনি চরণনলিনবিনিবেশম্ ।

তব পদপল্লববৈরিপরাভবমিদমনুভবতু সুবেশম্ ॥

ক্ষণমধুনা নারাযণমনুগতমনুসর রাধিকে ॥ ১॥

করকমলেন করোমি চরণমহমাগমিতাসি বিদূরম্ ।

ক্ষণমুপকুরু শযনোপরি মামিব নূপুরমনুগতিশূরম্ ॥ ২॥ ক্ষণমধুনা

বদনসুধানিধিগলিতমমৃতমিব রচয বচনমনুকূলম্ ।

বিরহমিবাপনযামি পযোধররোধকমুরসি দুকূলম্ ॥ ৩॥ ক্ষণমধুনা

প্রিযপরিরম্ভণরভসবলিতমিব পুলকিতমতিদুরবাপম্ ।

মদুরসি কুচকলশং বিনিবেশয শোষয মনসিজতাপম্ ॥ ৪॥ ক্ষণমধুনা

অধরসুধারসমুপনয ভাবিনি জীবয মৃতমিব দাসম্ ।

ত্বযি বিনিহিতমনসং বিরহানলদগ্ধবপুষমবিলাসম্ ॥ ৫॥ ক্ষণমধুনা

শশিমুখি মুখরয মণিরশনাগুণমনুগুণকণ্ঠনিনাদম্ ।

শ্রুতিযুগলে পিকরুতবিকলে মম শময চিরাদবসাদম্ ॥ ৬॥ ক্ষণমধুনা

মামতিবিফলরুষা বিকলীকৃতমবলোকিতমধুনেদম্ ।

মীলিতলজ্জিতমিব নযনং তব বিরম বিসৃজ রতিখেদম্ ॥ ৭॥ক্ষণমধুনা

শ্রীজযদেবভণিতমিদমনুপদনিগদিতমধুরিপুমোদম্ ।

জনযতু রসিকজনেষু মনোরমতিরসভাববিনোদম্ ॥ ৮॥ ক্ষণমধুনা

প্রত্যহঃপুলকাঙ্কুরেণ নিবিডাশ্লেষে নিমেষেণ চ

ক্রীডাকৃতবিলোকিতেঽধরসুধাপানে কথানর্মভিঃ ।

আনন্দাধিগমেন মন্মথকলাযুদ্ধেঽপি যস্মিন্নভূ-

দুদ্ভূতস্স তযোর্বভূব সুরতারম্ভঃ প্রিযং ভাবুকঃ ॥ ৮১॥

দোর্ভ্যাং সংযমিতঃপযোধরভরেণাপীডিতঃ পাণিজৈ-

রাবিদ্ধো দশনৈঃ ক্ষতাধরপুটঃ শ্রোণীতটেনাহতঃ ।

হস্তেনানমিতঃ কচেঽধরসুধাপানেন সম্মোহিতঃ

কান্তঃ কামপি তৃপ্তিমাপ তদহো কামস্য বামা গতিঃ ॥ ৮২॥

মারাঙ্কে রতিকেলিসংকুলরণারম্ভে তযা সাহস\-

প্রাযং কান্তজযায কিঞ্চিদুপরি প্রারম্ভি যৎসম্ভ্রমাত্ ।

নিষ্পন্দা জঘনস্থলী শিথিলতা দোর্বল্লিরুৎকম্পিতং

বক্ষো মীলিতমক্ষি পৌরুষরসঃ স্ত্রীণাং কুতঃ সিধ্যতি ॥ ৮৩॥

তস্যাঃ পাটলপাণিজাঙ্কিতমুরো নিদ্রকষাযে দৃশৌ

নির্ধূতাধারশোণিমা বিলুলিতস্রস্তস্রজো মূর্ধজাঃ ।

কাঞ্চীদামদরশ্লথাঞ্চলমিতি প্রাতর্নিখাতৈর্দৃশো-

রেভিঃ কামশরৈস্তদদ্ভুতমভূৎপত্যুর্মনঃ কীলিতম্ ॥ ৮৪॥

ত্বামপ্রাপ্য মযি স্বযংবরপরাং ক্ষীরোদতীরোদরে

শঙ্কে সুন্দরি কালকূটমপিবন্মূঢো মৃডানীপতিঃ ।

ইত্থং পূর্বকথাভিরন্যমনসা বিক্ষিপ্য বামাঞ্চলং

রাধাযাঃ স্তনকোরকোপরি চলন্নেত্রে হরিঃ পাতু বঃ ॥ ৮৫॥

ব্যালোলঃ কেশপাশাস্তরলিতমলকৈঃ স্বেদলোলৌ কপোলৌ

স্পষ্টা দষ্টাধরশ্রীঃ কুচকলশরুচা হারিতা হারযষ্টিঃ ।

কাঞ্চীকাঞ্চ্যুদ্গতাশাং স্তনজঘনপদং পাণিনাঽঽচ্ছাদ্য সদ্যঃ

পশ্যন্তী চাত্মরূপং তদপি বিলুলিতং স্রগ্ধরেযং ধুনোতি ॥ ৮৬॥

ঈষন্মীলিতদৃষ্টিমুগ্ধহসিতং সীৎকারধারাবশা-

দব্যক্তাকুলকেলিকাকুবিকসদ্দন্তাংশুধৌতাধরম্ ।

শ্বাসোৎকম্পিপযোধরোপরি পরিষ্বঙ্গাৎকুরঙ্গীদৃশো

var - : শান্তস্তব্ধপযোধরং ভৃশপরি

হর্ষোৎকর্ষবিমুক্তনিঃস্সহতনোর্ধন্যো ধযত্যাননম্ ॥ ৮৭ ॥

অথ কান্তং রতিক্লান্তমপি মণ্ডনবাঞ্ছযা ।

নিজগাদ নিরাবাধা রাধা স্বাধীনভর্তৃকা ॥ ৮৮॥

var -

অথ সা নির্গতবাধা রাধা স্বাধীনভর্তৃকা ।

নিজগাদ রতিক্লান্তাং কান্তাং মণ্ডনবাঞ্ছযা ॥

ইতি সহসা সুপ্রীতং সুরতান্তে সা নিতান্তখিন্নাঙ্গী ।

রাধা জগাদ সাদরমিদমানন্দেন গোবিন্দম্ ॥ ৮৯॥

{॥ গীতম্ ২৪ ॥}

কুরু যদুনন্দন চন্দনশিশিরতরেণ করেণ পযোধরে ।

মৃগমদপত্রকমত্র মনোভবমঙ্গলকলশসহোদরে ।

নিজগাদ সা যদুনন্দনে ক্রীডতি হৃদযানন্দনে ॥ ১॥

অলিকুলগঞ্জনমঞ্জনকং রতিনাযকসাযকমোচনে ।

ত্বদধরচুম্বনলম্বিতকজ্জলমুজ্জ্বলয প্রিয লোচনে ॥ ২॥ নিজগাদ

নযনকুরঙ্গতরঙ্গবিলাসনিরাসকরে শ্রুতিমণ্ডলে ।

মনসিজপাশবিলাসধরে শুভবেশ নিবেশয কুণ্ডলে ॥ ৩॥ নিজগাদ

ভ্রমরচযং রচহযন্তমুপরি রুচিরং সুচিরং মম সম্মুখে ।

জিতকমলে বিমলে পরিকর্ময নর্মজনকমলকং মুখে ॥ ৪॥ নিজগাদ

মৃগমদরসবলিতং ললিতং কুরু তিলকমলিকরজনীকরে ।

বিহিতকলঙ্ককলং কমলানন বিশ্রমিতশ্রমশীকরে ॥ ৫॥ নিজগাদ

মম রুচিরে চিকুরে কুরু মানদ মনসিজধ্বজচামরে ।

রতিগলিতে ললিতে কুসুমানি শিখণ্ডিশিখণ্ডকডামরে ॥ ৬॥ নিজগাদ

সরসঘনে জঘনে মম শম্বরদারণবারণকন্দরে ।

মণিরশনাবসনাভরণানি শুভাশয বাসয সুন্দরে ॥ ৭॥ নিজগাদ

শ্রীজযদেববচসি রুচিরে হৃদযং সদযং কুরু মণ্ডনে ।

হরিচরণস্মরণামৃতনির্মিতকলিকলুষজ্বরখণ্ডনে ॥ ৮॥ নিজগাদ

রচয কুচযোঃ পত্রং চিত্রং কুরুষ্ব কপোলযো-

র্ঘটয জঘনে কাঞ্চীমঞ্চ স্রজা কবরীভরম্ ।

কলয বলযশ্রেণীং পাণৌ পদে কুরু নূপুরা-

বিতি নিগতিতঃ প্রীতঃ পীতাম্বরোঽপি তথাকরোত্ ॥ ৯০॥

পর্যঙ্কীকৃতনাগনাযকফণশ্রেণীমণীনাং গণে

সঙ্ক্রান্তপ্রতিবিম্বসঙ্কলনযা বিভ্রদ্বপুর্বিক্রিযাম্ ।

পাদাম্ভোরুহধারিবারিধিসুতামক্ষ্ণাং দিদৃক্ষুঃ শতৈঃ

কাযব্যূহবিচারযন্নুপচিতাকূতো হরিঃ পাতু বঃ ॥ ৯১॥

যন্নিত্যৈর্বচনৈর্বিরিঞ্চগিরিজাপ্রাণেশমুখ্যের্মুহুঃ

নানাকারবিচারসারচতুরৈর্নাদ্যাপি নিশ্চীযতে ।

তৎসর্বৈর্জযদেবকাব্যঘটিতৈস্সৎসূরিসংশোধিতৈ-

রাদ্যং বস্তু চকাস্তু চেতসি পরং সারস্যসীমাজুষাম্ ॥ ৯২॥

যদ্গান্ধর্বকলাসু কৌশলমনুধ্যানং চ যদ্বৈষ্ণবং

যচ্ছৃঙ্গারবিবেকতত্বরচনাকাব্যেষু লীলাযিতম্ ।

তৎসর্বং জযদেবপণ্ডিতকবেঃ কৃষ্ণৈকতানাত্মনঃ

সানন্দাঃ পরিশোধযন্তু সুধিযঃ শ্রীগীতগোবিন্দতঃ ॥ ৯৩॥

সাধ্বী মাধ্বীকচিন্তা ন ভবতি ভবতঃ শর্করে কর্কশাসি

দ্রাক্ষে দ্রক্ষ্যন্তি কে ত্বামমৃত মৃতমসি ক্ষীরনীরং রসস্তে ।

ক্রন্দ কান্তাধর ধরণিতলং গচ্ছ যচ্ছান্তিভাবং

যাবচ্ছৃঙ্গারসারস্বতমিহ জযদেবস্য বিষ্বগ্বচাংসি ॥ ৯৪॥

শ্রীভোজদেবপ্রভবস্য রাধাদেবীসুতশ্রীজযদেবকস্য । var - রামাদেবী

পরাশরাদিপ্রিযবর্গকণ্ঠে শ্রীগীতগোবিন্দকবিত্বমস্তু ॥ ৯৫॥

॥ ইতি শ্রীজযদেবকৃতৌ গীতগোবিন্দে সুপ্রীতপীতাম্বরো নাম দ্বাদশঃ সর্গঃ ॥

॥ ইতি গীতগোবিন্দং সমাপ্তম্ ॥

¡তি

The following additional verses are found in some editions:

at the end of Sarga 11, after gItaM 22

সানন্দং নন্দসূনুর্দিশতু মিতপদং সম্মদং মন্দমন্দং

রাধামাধায বাহ্বোর্বিবরমনুধৃঢং পীডযন্ প্রীতিযোগাত্ ।

তুঙ্গৌ তস্যা উরোজাবতনুরবতনোর্নির্গতৌ মাস্ম ভূতাং

পৃষ্ঠং নির্ভিধ্য তস্মাদ্বলিরিতি বলিতগ্রীবমালোকযন্ বঃ ॥

at the end of Sarga 12

সাধূনাং স্বত এব সম্মতিরিহ স্যাদেব ভক্ত্যার্থিনাং

আলোচ্য গ্রথনশ্রমং চ বিদুষামস্মিন্ভবেদাদরঃ ।

যে কেচিত্ পরকৃত্যুপশ্রুতিপরাস্তানর্থয়ে মৎকৃতিং

ভূয়ো বীক্ষ্য বদন্ত্বদ্যমিতি চেৎসা বাসনা স্তাস্যতি ॥

ইত্থং কেলিততৈর্বিহৃত্য যমুনাকূলে সমং রাধযা

তদ্রোমাবলিমৌক্তিকাবলিযুগে বেণীভ্রমং বিভ্রতি ।

তত্রাহ্লাদিকুচপ্রযোগফলযোর্লিপ্সাবতোর্হস্তযোর্-

ব্যাপারাঃ পুরুষোত্তমস্য দদতু স্ফীতাং মুদং সম্পদম্ ॥

Encoded and proofread by P. P. Narayanaswami swami at mun.ca

Proofread by PSA Easwaran

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gita Govindam Lyrics in Bengali PDF
% File name : giitagovindaM.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : P. P. Narayanaswami at swami at math.mun.ca

% Proofread by : P. P. Narayanaswami at swami at math.mun.ca, PSA Easwaran
% Latest update : October 1, 2010, May 10, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website